CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥ दशाक्षरस्तोत्र ॥महादेवउवाच॥ ॐनमःशिवायेगंगायै
शिवदायैनमोनमः॥नमस्तेविष्णुरूपिण्यैब्रह्ममूर्त्यैनमोनमः॥१॥नमस्ते
रुद्ररूपिण्यैशांकर्यैतेनमोनमः॥सर्वदेवस्वरूपिण्यैनमोभेषजमूर्तये
॥२॥सर्वस्यसर्वव्याधीनांभिषक्श्रेष्ठ्यैनमोस्तुते॥स्थाणुजंगमसंभू
तविषहंत्र्यैनमोस्तुते॥३॥संसारविषनाशिन्यैजीवनायैनमोस्तुते॥ता
पत्रितयसंहंत्र्यैप्राणेशायैतेनमोस्तुते॥४॥शांतिसंतानकारिण्यैनम
स्तेशुद्धमूर्तये॥सर्वसंशुद्धिकारिण्यैनमःपापारिमूर्तये॥५॥भु
क्तिमुक्तिप्रदायिन्यैभद्रदायैनमोनमः॥भोगापभोगदायिन्यैभोग
वत्यैनमोस्तुते॥६॥मंदाकिन्यैनमस्तेस्तुस्वर्गदायैनमोनमः॥नमस्त्रैलो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

क्यभूषायैत्रिपथायैनमोनमः॥ ७॥नमस्त्रिशुक्लसंस्थायैक्षमावत्यैनमोनमः॥
त्रिकुलाज्ञानसंस्थायैतेजोवत्यैनमोनमः॥८॥नंदायैलिंगधारिण्यैसुधाधा
रात्मनेनमः॥नमस्तेविश्वमुख्यायैरेवत्यैतेनमोनमः॥९॥बृहत्यैतेनमस्ते
स्तुलोकधात्र्यैनमोनमः॥नमस्तेविश्वमित्रायैनंदिन्यैतेनमोनमः॥१०॥
पृथिव्यैशिवामृतायैसुव्रतायैनमोनमः॥परापरशताक्ष्यायैतारायैतेनमो
नमः॥११॥पाशजालनिकृंतिन्यैअभिन्नायैनमोस्तुते॥शांतायैचवरिष्ठा
यैवरदायैनमोनमः॥१२॥उग्रायैसुरवंद्यायैचसंजीविन्यैनमोस्तुते॥
ब्रह्मिष्ठायैब्रह्मदायैदुरितघ्नेनमोनमः॥१३॥प्रणतार्तिप्रभंजिन्यैजग
न्मात्रेनमोस्तुते॥सर्वापत्प्रतिपक्षायैमंगलायैनमोनमः॥१४॥शर ९
णागतदीनार्तपरित्राणपरायणे॥सर्वस्यार्तिहरेदेविनारायणिनमोस्तुते॥१५॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मिरेऽपाये दुर्गहृच्यैदक्षायैते नमोनमः॥ परास्रपायेचगंगेनिर्वाणदा
यिनी॥१६॥गंगेममाग्रतोभूयाद्गंगेमेदक्षिणेपृष्ठतः॥गंगेमेपार्श्वयोरधि
गंगेत्वय्यस्तुमेस्थितिः॥१७॥आदौत्वमंतेमध्येचसर्वंत्वंगंगातेशिवे॥१८
॥त्वमेवमूलप्रकृतिस्त्वंपुमान्परएवहि॥गंगेत्वंपरमात्माचशिवःस्तुभ्यं
नमःशिवे॥१९॥यइदंपठतिस्तोत्रंशृणुयाद्वापियःसदाधामुच्य
तेपापैःकायवाङ्मनसंभवैः॥२०॥रोगस्तोरोगतोमुच्येद्बद्धश्चविपद्यतः॥मुच्यतेबंधनाद्बद्धोभीतोभीतिःप्रमुच्यते॥२१॥सर्वान्का
मानवाप्नोतिप्रेत्यचत्रिदिवंव्रजेत्॥दिव्यंविमानमारुह्यदिव्यस्त्री
परिवीजितः॥२२॥गृहेपित्रिखितंयस्यसदातिष्ठतिधारितं॥ना
ग्निचोरभयंतस्यनसर्पादिभयंक्वचित्॥२३॥ज्येष्ठमासिसितेपक्षे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दशमीहस्तसंयुता ॥ संहरेन्त्रिविधं पापं बुधवारेण संयुता ॥२७॥ तस्यादशम्या
मेतच्चस्तोत्रं गंगाजलेस्थितः ॥ यःपठेद्दशकृत्वस्तुदरिद्रोवापिचाक्षमः ॥२५
॥ सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नतः ॥ पूर्वोक्तेनविधानेनयत्फलं
प्रकीर्त्तितं ॥२६॥ यथागौरीतथागंगातस्माद्गौर्यास्तुपूजने ॥ योविधिर्वि
हितःसम्यक्सोपिगंगाप्रपूजने ॥२७॥ यथाहंत्वंतथाविष्णोतथात्वंतु
तथात्क्रमा ॥ उमायथातथागंगावतुरूपंनभिद्यते ॥२८॥ विष्णुरुद्रा
तरंचैवश्रीगौर्यैरंतरंतथा ॥ गंगागौर्यैतरंयश्चयोन्नेतेमूढधीस्तुसः ॥२९॥
इतिश्रीस्कंदपुराणेकाशिखंडेगंगामाहात्म्ये

Kashi Maharani Collection, Ramnagar Fort, Varanasi